"दुहाना धेनुर्वृजनेषु कारवेत्मना शतिनं पुरुरूपमिषणि" ऋ० २,२,९, इषणि एषणायाम् भा०। सप्तम्या लुक्। लोके तु एषणिः वा ङीप्। इषणिमिच्छति क्यच्। वेदे० नि० इलोपः इषण्यति "ऋतस्य बुध्न उषसामिषण्यन्" । ऋ० ३,६१,७, ततः भावे अ। "इषण्या प्रेषणायाम् "इषण्यया नः पुरुरूपमाभर" ऋ० ८,४९,१८।

**इषव्य** त्रि० इषुणा विध्यति इषौ कुशलो वा यत्। शरलक्ष्ये, १शरव्ये २शरत्यागकुशले च "आराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी" यजु०ऋ०२२,२२ "इषुभिर्विध्यति इषव्यः यद्वा इषौ कुशलः" वेददी० [धातयः" ऋ० ९,७९,१,

**इषि** त्रि० इष–कि। इच्छावति "विचिदश्नाना इषयो‍व्य-

**इषिका** स्त्री इष–गत्यादौ क्वुन् अत इत्त्वम्। इषीकाशब्दार्थे तूलशब्दपरे ह्रस्वः इषिकतूलम्" तदीयतूले।

**इषीका** स्त्री ईष–गत्यादिषु ईकन् कित् ह्रस्वश्च। १गजनेत्रगोलके। २काशे, ३मुञ्जामध्यवर्त्तितृणे च तदालम्ब्यैव अश्वत्थाम्ना पाण्डववधाय महास्त्रं परित्यक्तम् यथा भा० प्र० १४अ० "व्यथितात्माऽभवत् द्रौणिः प्राप्तञ्चेममन्यत। तत्र दिव्यमदीनात्मा परमास्त्रमचिन्तयत्। जग्राह च स चेषीकां द्रौणिः सव्येन पाणिना। स तामापदमासाद्य दिव्यमस्त्रमुदैरयत्" इत्युपक्रम्य "ततस्तस्यामिषीकायां पावकः समजायत। प्रधक्ष्यन्निव लोकांस्त्रीन् कालान्तकयमोपमः" इमामिषीकामधिकृत्य कृतो ग्रन्थः अण् ऐषीकं भारतान्तर्गतपर्वभेदे "मुञ्जादिषीकां तूलमिति" शत०ब्रा० "यदि नडानां यदि वेणूनां यदि वेषीकाणाम्" शत०ब्रा० १,१,४,१९, ४शरशलाकायां ५वीरणकाष्ठिकायाञ्च उज्ज्व० "तस्मिन्नास्थदिषीकास्त्रं रामोरामावबोधितः" रघुः।

**इषिर** त्रि० इष–गतौ किरच्। १गतिशीले। "शं न इषिरो अभिया रातः" ऋ० ७,३५,४, "इषिरः गतिशीलः" भा० २चलनशीले च "निसामनामिषिरामिन्द्र! भूमिम्" ऋ० ३, ३०,९। "इषिरां चलन्तीम्" भा० ४अग्नौ पु० उज्ज्व०

**इषु** पुंस्त्री ईष्यते हिंस्यतेऽनेन ईष–उ ह्रस्वश्च। १वाणे "प्रतिसंहरन्निषुम्" रघुः। "इषुमति रघुसिंहे दंदशूकान् जिघांसौ" भट्टिः। "इषुभिः प्रतियोत्स्यामि" गीता स्त्रीत्वे "तस्य साध्वीरिषवो याभिरस्यति" ऋ० २,२१,४,८। "यामिषुं गिरिशन्त! बिभर्ष्यस्तवे" यजु० १६,३। तत्तुल्यसंख्ये २पञ्चसंख्यान्विते च। पञ्चशरशब्दे वक्ष्यमाणस्य कामशरस्य पञ्चसंख्याकत्वस्यानुसारेण शरशब्देन हि पञ्चसंख्या बोध्यते। "पञ्चपञ्चाष्टसप्तेषु ज्ञेयमोजःसु राशिषु" ज्योति०। ३ वृत्तक्षेत्रान्तर्गते जीवावधिपरिधिपर्य्यन्तकृतसरलरेखायाञ्च तदानयनप्रकारः सोदाहरणः लीला०दर्शितो यथा

"ज्याव्यासयोगान्तरघातमूलं व्यासस्तदूनोर्दलितः शरः स्यात्। व्यासाच्छरोनाच्छरसङ्गुणाच्च मूलं द्विनिघ्नं भवतीह जीवा। जीवार्द्धवर्गे शरभक्तयुक्ते व्यासप्रमाणं प्रवदन्ति वृत्ते" उदा० दशविस्तृतिवृत्तान्तर्यत्र ज्या षण्मिता भवेत्। तत्रेषुं वद बाणाज्ज्यां ज्यावाणाभ्याञ्च विस्तृतिम्" न्यासः। व्यासः १०, ज्या ६, अनयोर्योगः १६, अन्तरं ४ तयोर्घातो ६४, तस्य मूलं ८, तेनोनोव्यासः २, दलितः शरः १। तेन १०हस्तव्यासके वृत्तक्षेत्रे यदि जीवमितिः ६ तदा शरमानम् १ एकहस्त इति ज्ञेयम्। ज्ञातशरव्यासके वृत्तक्षेत्रे जीवानयनं यथा व्यासः १० हस्तः, शरः १हस्तः तेनोनितः व्यासः ९, तस्य मूलम् ३। द्वाभ्यां गुणितम् ६, जीवामानम्। ज्ञाताभ्यां ज्यावाणाभ्यां व्यासानयनम्। यथा जीवा ६ तस्यार्द्धं ३, तस्य वर्गः ९। शरसंख्यया १ भक्तो ९। शरसंख्यया १ योगे व्यासमानम् १०। एवमन्यसंख्यकजीवादौ अनया दिशा शराद्यानयनम्। ग्रहाणां क्रान्तिवृत्तक्षेत्रस्य शरानयनं संक्षेपेण दर्शितम् सि०शि०

"सत्रिराशिग्रहद्युज्यानिघ्नस्त्रिज्योद्धृतः शरः। स्फुटोऽसौ क्रान्तिसंस्कारे दृक्कर्मण्ययनजे तथा" मू०। "अयं संक्षिप्तो गौणप्रकारः। मुख्यस्तु पूर्वं व्याख्यात एव। तथापीह युक्तिमात्रमुच्यते। विषुवद्वृत्तात् क्रान्तिर्ध्रुवाभिमुखी। क्रान्त्यग्राच्छरः कदम्बाभिमुखः। कथं तेन तिर्य्यक्स्थेन सा संस्कार्या। अतः क्रान्त्यग्रे यद्द्युज्यावृत्तं तस्य शराग्रस्य च यदन्तरमृजु तेन संस्कृता सती स्फुटा भवति। तज्ज्यान्तरं कोटिरूपम्। शरः कर्णरूपः। तद्वर्गान्तरपदं द्युज्यावृत्ते भुजः। एतत् त्र्यस्रं दिग्वलनजत्र्यस्रसंभवम्। तत्र सत्रिराशिग्रहक्रान्तिः कदम्बध्रुवसूत्रयोरन्तरम्। तज्ज्या भुजः। तद्द्युज्या कोटिस्त्रिज्या कर्णः। यदि त्रिज्ययेयं कोटिस्तदा शरेण केत्युपपन्नम्। कोटिरूपस्यैव शरस्य ध्रुवोन्मुखस्यात्तज्ज्ययाऽयनजं दृक्कर्म्म कर्त्तुं युज्यते" प्रमि० विस्तरस्तत्रैव "विक्षेपलिप्ताः क्षितिजादिकानां खेशा ११० द्विवाणेन्दुमिता १५२ रसाश्वाः ७६। षट्त्रीन्दवः १३६, खाग्निभुवः १३० सितज्ञपातौ स्फुटौ स्वस्वलकेन्द्रयुक्तौ" मू० "क्षितिजस्य खरुद्रमिता ११० मध्यमा